# चण्डालभिक्षुकी
## chaNDaalabhikShukii[1]

उत्तरे भारते ख्यातां श्रावस्तिं निकषा पुरा।
ग्रामे पञ्चशतात् पूर्वं द्विसहस्राच्च वत्सरात्॥ १॥

घोरातपे शिरीषेषु पुष्पितेषु च सर्वतः।
मध्याह्ने मरुतुल्ये विच्छाये देशे कदाचन॥ २॥

आतपज्वालयात्यर्थमर्कं जाज्ज्वल्यमानया।
स्पर्धमानेव सततं ज्वलति स्म वसुन्धरा॥ ३॥ विशेषकम्॥

सुदीर्घा सरणिः शून्या पौरस्त्या तत्र विद्यते।
स्रवन्तीव विरेजे सुस्वच्छा मरुमरीचिका॥ ४॥

आरात् प्रतीच्यामाकाशभित्तौ संस्पृशति स्म सा।
दृश्यते पादपः कश्चित् तत्र निश्चलमेघवत्॥ ५॥

हरिन्मणिवदत्यन्तमसृणानां मनोहराम्।
वज्रशोभां वितन्वत् तत्पर्णानामुपरि स्वयम्॥ ६॥

चण्डांशुरश्मिभिस्तत्र मेघोपरि विराजते।
चेतोहारकमत्यर्थमेकं रजतमण्डलम्॥ ७॥ युग्मकम्॥

वटद्रुमोऽसौ यस्मिन् सुफलानि बहुलान्यहो।
हरित्तृणाढ्यशाखायामैन्द्रजालिकगोळवत्॥ ८॥

आकाशं भूरिशाखाग्रैर्भूमिं मूलैश्च लम्बिभिः।
व्याप्नुवन् वर्तते योऽसौ, पत्रच्छायासुशीतळे॥ ९॥

तस्य शाखाचये सन्ति बहवश्च पतत्रिणः।
घोरातपभयोद्रिक्तास्तं स्वैरं शरणागताः॥ १०॥ युग्मकम्॥

तापार्ताः शुष्ककण्ठा न गातुकामाः खगा इमे।
म्ळानाः क्षीणा न कुर्वन्ति भक्ष्यान्वेषणमप्यहो॥ ११॥

आवृत्योड्डयनं कृत्वा तस्मात् खात् प्राप च क्षणम्।
पक्षदाहभयात् स्कन्धशाखां श्येनोऽस्य कश्चन॥ १२॥

नाक्रान्तुकामोऽसौ यस्मान्न भीतश्चटकोऽपि हा।
क्ळान्ताङ्गो दुःखितो जन्तुर्न नैसर्गिकभावभाक्॥ १३॥

विततस्यास्यैकवृक्षवनस्याधः प्रभासते।
पान्थोचितं च जीर्णत्वङ्गुहामूलवरासनम्॥ १४॥

---

[1] Orginal poem in Malayalam by Mahakavi Kumaranasan. Translated into Sanskrit by N.V.P. Unithiri, Prof. of Sanskrit, University of Calicut, Kerala.

तत्र तत्र तु पाथेयसूत्रपत्रादिकं वृथा।
छिन्नभिन्नं दृश्यतेऽत्र वीथीनामन्त्यसीमसु॥ १५॥

चतुष्पथस्य पार्श्वेऽस्ति कश्चित् कृष्णशिलामयः।
भारवाही; समीपेऽतिजीर्णकूपोऽपि दृश्यते॥ १६॥

हित्वा प्राचीमहामार्गं ग्रामवीथ्या चरन्निह।
अभ्यायात्यवशः कश्चिद् भिक्षुवर्योऽयमादृतः॥ १७॥

मञ्जुपीताम्बरेणैकेनास्य देहः समावृतः।
मुण्डनेन शिरो वक्त्रबिम्बं च मसृणीकृतम्॥ १८॥

कपालमेकमेकान्तदीर्घवृत्तमनोहरम्।
धारयत्ययमारम्यवामदीर्घकरेण च॥ १९॥

व्यजनस्वर्णपक्षं च दक्षिणेन तु पाणिना।
धृतं चेतोहरं मन्दं चालयन् वीजयत्यसौ॥ २०॥

एवंविधो भिक्षुकोऽसौ प्राप बन्धुममुं तरुम्।
एकपक्षेणैव युक्ता देवतेव च काचन॥ २१॥

विन्यस्य वृक्षमूलेऽसौ कपालं व्यजनं तथा।
यात्राक्लेशविषादेन फूत्कारं चाकरोत् तदा॥ २२॥

पीताम्बराञ्चलेनासौ स्वेदमुत्सारयन् द्रुतम्।
नेत्रं सञ्चारयामास योगी कूपं प्रति क्षणम्॥ २३॥

तदा तत्रागता काचित् तरुणी चारुदर्शना।
मन्दं बहिर्ग्रामदेशात् पथिकूपान्तिकं मुदा॥ २४॥

घटं लघुतमं त्वेकमसौ गृह्णाति पार्श्वतः।
कटकाञ्चितत‌द्वामभुजालतिकया वृतम्॥ २५॥

वीजयद्दक्षिणालोलहस्तवल्लिकयाप्यसौ।
लीलया पाळिकापाशं लम्बमानमधारयत्॥ २६॥

स्वल्पानताङ्गमावृत्य दक्षिणे पार्श्वलम्बिनम्।
आरक्तशोभनं चेलाञ्चलमावीज्य पार्श्वतः॥ २७॥

अञ्चिते पादविन्यासे लोले पादसरे धृतम्।
किङ्किणीसञ्चयं चालयन्त्यसावभिगच्छति॥ २८॥ युग्मकम्॥

काकतालीयमेवात्र सम्बभूवेति चिन्तयन्।
भिक्षुकः शुल्ककण्ठोऽसौ त्वरां सम्प्राप्तवान् क्षणम्॥ २९॥

अथवा दुःखितावस्था सतां यदि भवेत् तदा।
नियतिर्विविधाकारेणायाति परिरक्षितुम्॥ ३०॥

II

पाळीं मनोज्ञामथ पातयित्वा
कूपे समाकृष्य करेण पाशम्।
आदाय नीरं सुदती स्थिता सा,
श्रीमान् स तां प्रार्थतति स्म भिक्षुः॥ १॥

"पिपासुरस्मि त्वमिहाशु देहि
प्रिये! भगिन्यम्बु कृपारसार्द्रम्।
सुशीतळं मोहनमल्प" मित्थं
श्रुत्वाह सम्भ्रम्य मनोहरी सा॥ २॥

"किमद्भुतं! कष्टमियं कथा! त्वं
दुःखेन जातिं ननु विस्मृतोऽसि।
नीचस्त्रिया दत्तजलं गृहीत्वा
ख्यातः किमाचामति चार्यजातः॥ ३॥

मह्यं तु मा भूः कुपितोऽम्बु दास्या-
म्यथापि पापा भवितास्मि नूनम्।
चण्डाल्यहं चामरनायकस्य
पुत्री बहिर्ग्रामनिवासिनोऽपि"॥ ४॥

अथाह भिक्षुर्नितरां विलक्षः,
"पृच्छामि जातिं न हि सोदरि! त्वाम्।
पृच्छामि तोयं परिशुल्ककण्ठः,
प्रयच्छ मह्यं त, दलं भयेन"॥ ५॥

ततोऽरुणाब्जाभभुजापुटं स्वं
प्रसार्य तस्थौ सुकुमारगात्रः।
अथो न साभूत् प्रतिवादिनी, यं
यतो हि तन्वी न शिला न चायः॥ ६॥

आवृत्य कृष्णं निजकेशपाशं,
सम्यक्तया संवृतशीर्षकास्यम्।
उत्सार्य मन्दं सुमनोज्ञचेलं,
मन्दस्मितार्द्रस्फुटिताधरा सा॥ ७॥

सविस्मयस्फारिततारनेत्रा
स्थिता निमेषार्धमभूत् तथैव।
अहर्मुखे रक्तदळाभसूर्य-
प्रकाशपूरावृतसर्वगात्रम्॥ ८॥

स्पर्शेन भृङ्गस्य विकासमाप्तं
सरोरुहं रक्तमनोहरं तत्।
यद्वन्निजान्तर्गतकेसराणि
सन्दर्शयद् वर्तत एव तद्वत्॥ ९॥ विशेषकम्॥

अनन्तरं बाहुसुमस्य कम्पात्
स्खलद्गतेः पूर्णतया बहिर्गम्।
विच्छिन्नमध्यस्फुटितोद्विलास-
संशुद्धसद्दर्पणकान्तिनीरम्॥ १०॥

पारं पिपासार्तिवशेन भिक्षु-
वर्येण सम्यक् परिसारितेऽस्मिन्।
प्रवाहयन्ती कुसुमार्द्रपाणौ
तस्थावियं मन्दमिहानताङ्गी॥ ११॥ युग्मकम्॥

त्वयाधुना प्रस्नवितानि पुण्य-
शालिन्यमून्यम्बुकणानि यानि।
समर्पयेयुस्तव चान्तरात्म-
न्यनन्तपुण्यात्मकचारुहारान्॥ १२॥

कोऽसौ यतिः सर्वसुशिक्षितात्म-
निर्वाणकेष्वग्र्य इति त्वमद्य।
बाले, न जानासि तु तत्प्रसादः
संरक्षकस्त्वां परिवर्तयेत॥ १३॥

कराञ्जलावर्पितवक्त्रपद्मो
भिक्षुः पिपासार्तिभरो नताङ्गः।
तस्मिन् पतच्छीतळवारिपूरं
खर्जूरतन्त्रीनिभनिर्मलाभम्॥ १४॥

आकण्ठमास्वादयते पवित्रं
स्मरन्निव स्वीयविशुद्धभावी।
ग्रन्थोक्तवत् तत्क्षणिकत्वबन्धि-
विज्ञानधारेति परं प्रमाणम्॥ १५॥ युग्मकम्॥

महात्मनस्तस्य नितान्ततृप्तिं
निशाम्य रोमाञ्चवती स्थिता सा।
अलं जलेनेति निषेधति स्म
वीतामयो वामकरेण सोऽपि॥ १६॥

तीर्णक्ळमो भिक्षुवरः प्रजाग्रत-
सिरः सहर्षाननपद्मशोभः।
उन्नम्रशीर्षो मृदुलोहितार्द्रा-
पाङ्गस्फुरद्दीर्घमनोहराभ्याम्॥ १७॥

पक्ष्मावलीपूर्णविलोचनाभ्यां
कृतज्ञतां स्वां च निवेद्य शीघ्रम्।
निजोपकर्त्रीं रुचिराङ्गवल्लीं
निर्वर्ण्य तामेवमुवाच वाचम्॥ १८॥ युग्मकम्॥

"सिद्धो महान्, चन्द्रमुखि! प्रदृष्ट-
निर्वाणसौख्यश्च गुरुर्गुरूणाम्।
लोकैकवन्द्यः स दयानिधिस्त्वा-
मनुग्रहीष्यत्य,थ साधयामि"॥ १९॥

भूयोऽपि सोऽयं वटवृक्षमूलं
प्रापोन्नतः शान्तगभीरदृष्टिः।
यथापुरं सौगतको वटस्य
च्छायातले तत्र निषीदति स्म॥ २०॥

यथा शनैः काननसीम्नि चाल्प-
सरोवरं प्राप्य जलं निपीय।
गाढं पिपासार्तिभरं प्रशाम्य
स्वीयां दरीं प्राप्स्यति सिंहवर्यः॥ २१॥ युग्मकम्॥

अनन्तरं चासनबन्धनेन
धन्यो रराजेह समाधिलीनः।
फल्गोस्तटे पावनबोधिवृक्ष-
च्छायातले सद्गुरुमारजिद्वत्॥ २२॥

अद्भिः कुटं पूरितमेव कृत्वा
बहिस्तलं तत् परिमार्ज्य सम्यक्।
तत्रैव विन्यस्तवती समीपे
मनोहरीणां च शिरोमणिः सा॥ २३॥

दीर्घं च पाशं विनिवेश्य पाळ्यां
सज्जीचकार स्वयमत्र सर्वम्।
प्रयातुकामापि तथाऽप्रगल्भा-
लसं परिभ्रम्य चचाल मन्दम्॥ २४॥ युग्मकम्॥

शिरीषकोऽयं निकटस्थितो यः
सन्ध्याम्बरान्तःस्थितकोणतुल्यः।
चेतःसमाकृष्टवतश्च तस्य
च्छायां गतासीत् सुमनोहरी सा॥ २५॥

समीपमागत्य मनोज्ञमञ्जी-
मेकामवच्छिद्य निरीक्ष्य तां सा।
तमेव वृक्षं त्ववलम्ब्य वामे-
नांसेन तन्वी सुतरां कटाक्षैः॥ २६॥

दूरस्थितं भिक्षुवरं तमुद्दि-
श्यारम्यनीलस्रजमत्र बाला।
निर्माय मोघं भुवि मारदूती-
वैकेन पादेन हि तिष्ठति स्म॥ २७॥ युग्मकम्॥

III

म्लानः प्रकाशोऽभवदत्र मन्दं
तापोऽपि जह्रास, तदा स भिक्षुः।
उत्थाय जग्मे स्वयमेव, बाला-
प्यापालयं नष्टमणिर्यथा स्यात्॥ १॥

अत्यन्तखिन्नाथ बभूव सा च
प्रत्यक्षहेतोरवशा विनापि।
आक्रन्दमानास्ति गृहैककोणे
क्लिष्टा न कुत्रापि गता कदापि॥ २॥

शनैः शनैरत्र विनष्टपक्ष-
खद्योतवद् गच्छति वासरोऽपि।
स्वास्थ्यं न भेजे निशि चेय,मेत-
द्दिनेऽपि नासीदशनं न निद्रा॥ ३॥

भिक्षुः स रम्यः स वटद्रुमः स
मार्गः स कूपश्च परिस्थितिः सा।
सर्वं च दृष्टं त्वनया पुरोऽक्ष्णो-
र्निमीलनोन्मीलनयोः समानम्॥ ४॥

चिन्तागतिं वारयितुं न तन्वी
प्रगल्भते स्म स्वयमागतां ताम्।
स्वप्नश्च चिन्तेत्युभयं त्वभिन्नं
भूत्वा च साभूद् विवशान्तरङ्गा॥ ५॥

सुदीर्घरात्र्यन्तमपश्यमाना
विरक्तितः संलुठति स्म मञ्चे।
द्रुतोत्थिता सोपविवेश, गत्वा
कवाटमुद्घाट्य निरैक्षताशु॥ ६।

शशाप तन्वी च निशां, द्रुतं सा
पपात गत्वा मुहुरेव शय्याम्।
अस्वस्थचित्ता ज्वरसंभ्रमाद् भू-
तोपद्रवाद्वियमभूदहो! किम्?॥ ७॥

एकाकिनी चैवमवाच्यदुःखात्
कक्ष्यागताभूच्छबळाभभावा।
परन्तु तच्चित्तमभूदिदानीं
नूनं महापुण्यविकासपूर्णम्॥ ८॥

चण्डालगेहस्थतमःप्रपूर्ण-
कोष्ठे त्वदम्या विवशोन्मनाः स्यात्।
उलूकजम्बूकनिवेदितांस्तान्
यामान् क्रमात् सा विगणय्य चासीत॥ ९॥

चण्डालकन्याथ शृणोति ताम्र-
चूडार्द्रकण्ठागतकाहळं तत्।
उत्थाय मञ्चादियमश्रुपूर्ण-
स्फीताक्षिपद्मान् परिमार्ष्टि तन्वी॥ १०॥

उद्घाट्य कोष्ठं द्रुतमप्यळिन्दे
पदे प्रविन्यस्य बहिर्ददर्श।
तत्रोपविश्य क्षणमात्रमारा-
न्निःश्वस्य किञ्चित्त्वजिरं प्रपेदे॥ ११॥

बन्धूत्थितेर्दर्शनतश्च पूर्वं
कुत्रापि यानेच्छुरिवैव सेयम्।
हित्वाङ्कणं तत्पुरतश्च मार्गं
पश्चाद्गृहं सा प्रविलीय तस्थौ॥ १२॥

तदा जिगायेह बहिर्वृतिस्थो
व्युत्थाय चोच्चैश्चटकः किलैकः।
प्राचीगतः शीतळमारुतोऽपि
वाति स्म वृक्षान् परिलाळ्य नव्यान्॥ १३॥

म्लानोऽभवत् पूर्वदिशाकपोलः
शनैः शनैरल्पविलक्षतारः।
ततः क्षणाद् यातवती प्रपेदे
पद्यां सुगम्यां तरळायताक्षी॥ १४॥

भूयोऽपि दुःखात् प्रतिवर्त्य वीक्षा-
मधादथामन्त्रयतीव चान्ते।
स्वीयां कुटीं सा शबरी तु यत्र
जाता च पुष्टा प्रणयार्द्रशीला॥ १५॥

मुहुर्द्रुतं सा पथि सुन्दराङ्गी
ह्यायाति तत्कूपसमीपमेव।
जलाय नेहागमनं त्विदानीं
घटादिसन्नाहविधेरभावात्॥ १६॥

किञ्चातिदुःखा परितो भ्रमित्वा
चान्विष्य भिक्षोरिह पादमुद्राम्।
दृष्ट्वाशु निर्वर्ण्य विनम्रमूर्ति-
रन्वास्थिता सा निधिचोरिकावत्॥ १७॥

प्रसारितं ह्यो यतिना जलार्थं
यत् पाणिसूनं मृदुपाटलाभम्।
मनोहरं हा! स्मरणं तु तस्य
दत्ते नवाकांशुततिः प्रकामम्॥ १८॥

तत्स्पर्शलाभान्नवरक्तशोभं
पादाब्जमेवेदमिति प्रलोभात्।
रोमाञ्चयुग्गण्डवती विनम्रा
तन्वी तदाहा! परिचुम्बतीयम्॥ १९॥

भूमौ तदा चापतितं चलद्र-
क्तौष्ठ्या विलोलं लघुकुन्तळान्तम्।
ततः समुत्थाय जवाच्चरन्ती
महापथं प्राप्तवती नताङ्गी॥ २०॥

गत्वा विदूरं - न हि पादमुद्रा-
भिज्ञान,मस्माद् भयमाप किञ्चित्।
चन्द्राननेयं त्वनुयाति नूनं
तद्भिक्षुणाङ्गीकृतमेव मार्गम्॥ २१॥

खेदादहो! स्वामिपथं ग्रहीतुं
शक्तिर्यथा कुक्कुरनासिकायाः।
तथानघा यस्य न विद्यते त-
न्निजेन्द्रियं किन्नु शपेदिदानीम्॥ २२॥

पूर्वाह्णशोभाकृतरत्नसार-
नीरोक्षितारम्यपथेन सेयम्।
अभूज्जवात् पान्थवचोभिरेव
ज्ञात्वा प्रयान्ती निरवद्यमार्गम्॥ २३॥

श्रावस्त्यभिख्ये नगरे विशुद्धं
विहारकं जेतृवनं चकास्ति।
उपस्थितां तस्य विशालरथ्यां
जगाम चण्डालकुमारिकेयम्॥ २४॥

महावृतिस्तत्र विहारकारा-
मारक्षिका पुष्पितवृक्षयुक्ता।
वंशादिशाखान्तरितास्ति, कृष्ण-
शिलागजौ पालयतः कवाटम्॥ २५॥

ददर्श सान्तर्वरमन्दिराण्य-
प्युद्यानवृन्दैः सह तत्र तत्र।
प्रधानवीथी परिदृश्यते यत-
पार्श्वद्वये वृक्षततिर्विरेजे॥ २६॥

यज्ञाङ्गजंब्वाम्रवटादिनाना-
वृक्षाः प्रवृद्धाः सुमनोहराभिः।
छायाभिरेनामिह मुख्यवीथीं
कुर्वन्ति शान्तां परिमोहनां च॥ २७॥

गत्वा तयान्तर्गृहवासिनस्तान्
भिक्षून् ददर्शाधिकधन्यकन्या।
जग्राह कार्याणि च तत्र तत्र
पृष्ट्वा विना संशयमम्बुजाक्षी॥ २८॥

कुलं हि तत् सौहृदराज्यलक्ष्मी-
गृहं समत्वाद् सुखदं समेषाम्।
दूरागतेयं त्वकळङ्कितानां
स्वसेव चान्तेवसतां प्रियार्द्रा॥ २९॥

नूनं महिम्नैव विहारकस्य
सैषा भवेद् भागिकनष्टमोहा।
परिस्थितेः शक्तिगुणान्मनुष्याः
पवित्रिताः स्युर्ह्यतिपापिनोऽपि॥ ३०॥

सान्निध्यतः श्रीजगदेकधर्म-
पिता च साक्षाद् भगवानिदानीम्।
तथागतो हृद्यमिदं विहारं
चकार धन्यं परमं पवित्रम्॥ ३१॥

सन्द्रष्टुमाचार्यवरं तु पूर्वा-
रामाद् विहारात् प्रतिवेशिमुख्यात्।
अमुं विहारं परमप्रधानं
समागमिष्यन् यतिरस्ति कश्चित्॥ ३२॥

आनन्दभिक्षुर्विदितोऽयमेव
पान्थोऽनया दत्तजलस्तरुण्या।
अधीत्य वृत्तान्तमिमां दयावान्
समानिनायान्तिकमेव देवः॥ ३३॥

चण्डालबाला क्क निरक्षरेयं?
क्क वा स साक्षाज्जगदेकनाथः?।
नैवाथवातिथ्यविधावुदारा
गुरुर्लघुर्वेति भिदां तु पश्येत्॥ ३४॥

क्षणात् तदा सन्मणिमण्डपस्य
वेद्यामिहागच्छति रूपमेकम्।
ददर्श सा तद्वरभिक्षुवेषं
मनुष्यसौन्दर्यसमग्रभोगम्॥ ३५॥

खद्योत एवात्र गभीरतेज-
स्यानन्दभिक्षुस्तमहो! महान्तम्।
दृष्ट्वाऽवशाऽचारमजानती सा
संभ्रम्य तस्थौ भयवेपिताङ्गी॥ ३६॥

यथा प्रदीपस्य पुरः पतङ्गी
यथा विवस्वत्पुरतो धरित्री।
यथा त्रयीरत्नपुरश्च युक्ति-
वैकल्यपूर्णाज्ञतमोदितोक्तिः॥ ३७॥

अचाल्यबोधस्य पुरोऽप्रगल्भ-
सन्देहवच्चाप्यतिविह्वलाङ्गी।
दृष्ट्वा तदार्द्राशयवानभूत् स
विश्वासमस्यै वितरीतुकामः॥ ३८॥ विशेषकम्॥

तस्यां समार्द्रे पतिते सुनेत्रे,
ततो मृदुस्फीतवचःसुधास्ताः।
शुभार्द्ररम्याः स्म तदीयवक्त्र-
पद्माद् गभीरं मधुरं सरन्ति॥ ३९॥

"वत्से! त्वयायातमिहेति सम्यक्
सर्वं मया ज्ञातमये सुभद्रे!।
प्रशामिताऽब्दानकृता त्वयैवा-
नघाशयानन्दमुनेः पिपासा॥ ४०॥

इतःपरं मा भव जन्ममृत्यु-
दुःखप्रदा ते तु निसर्गतृष्णा।"
ज्ञात्वा च तद्भावमसौ चकार
धर्मोपदेशं विमलं तरुण्यै॥ ४१॥

आज्ञापयामास ततो निवस्तुं
गृहे तु तां सम्प्रति भिक्षुकीनाम्।
अनन्तरं स स्वयमेव चान्त-
र्जगाम निःसीमकृपासमुद्रः॥ ४२॥

वत्से! प्रसूनकलिके! तव शीर्षकेऽस्मिन्
सुव्यक्तविस्फुरितरम्यतुषारबिन्दौ।
चेतोहरस्त्वरुणनिर्मितपद्मरागो
नैवार्थवानिह दिवाकरदीप्तिपुञ्जे॥ ४३॥

किञ्चात्र मौक्तिकधरा कणिका विधूय
मन्दं सुधा सुहृदये तव निर्गळेद् वा।
कल्यः समागत, इतः स्फुटिता समग्र-
शोभां मनोज्ञसुमनाः! प्रभजिष्यसे त्वम्॥ ४४॥

IV

भिक्षुणीमन्दिरे बुद्धशिक्षितोवास शाबरी।
तत्याज भूषणान्येषा तुष्टा चिकुरमुण्डने॥ १॥

अन्यासां श्रमणीनां सद्वेषमेषाप्यधारयत्।
अष्टाङ्गधर्ममार्गं च जग्राहायत्नतः क्षणात्॥ २॥

मैत्र्यादिभावनाश्चित्ते पावनाः शीलितास्तया।
अधीतानन्दनिर्वाणवर्षिध्याना च साऽभवत्॥ ३॥

धर्मैर्निर्मलशीलाभिर्भगिनीभिः सहादरात्।
रेमे च स्नानाशनादिष्वैकमत्येन सा सदा॥ ४॥

कृत्यानि च यथाकालमकरोत् प्रत्यहं मुदा।
प्रातरुत्थाय नियमं कृत्वाऽऽरामगता कृशा॥ ५॥

कृतस्निग्धशिलामुग्धसोपानैस्तत्र सुन्दरा।
पुष्पिताब्जसुगन्धार्द्ररम्यनीरास्ति वापिका॥ ६॥

हस्तेन कलशं धृत्वा सुहृद्युवतिभिः सह।
प्रविश्य तत्र सन्तुष्टा सैषा सलिलमाददे॥ ७॥

महिळालयमागत्य ततः सा तत्र चत्वरे।
वल्लरीः सेचयामास सखीभिः सह लीलया॥ ८॥

ततः पवित्रशीलैषा दन्तधावनतः परम।
स्नात्वा पीताम्बरं सम्यग् धावित्वाऽन्यदधारयत्॥ ९॥

आत्तकौतूहलं रम्यपुष्पाण्याचित्य सत्वरम्।
श्लाघ्याभ्यो धर्ममातृभ्यः समर्प्यैता अवन्दत॥ १०॥

शुश्राव धर्मतत्त्वानि सश्रद्धं सा तदास्यतः।
मध्याह्नलब्धां सद्भिक्षामश्नाति स्म सुनिर्मलाम्॥ ११॥

एवं कालं निनायेह स्नेहार्द्रे धर्ममन्दिरे।
एकान्तानन्दतस्तन्वी लोकान्तरगतेव सा॥ १२॥

तन्मन्दिरे वसन्तीनां भिक्षुणीनां दिनं प्रति।
राज्ञीनां ब्राह्मणीनां च वैश्यानां ववृधे तदा॥ १३॥

सुशीलानामहो! तस्यां स्नेहादरविभावना।
गुणाधिक्याद् भगवतोऽप्यस्यां प्रीतिरवर्धत॥ १४॥ युग्मकम्॥

काम्येऽस्मिन् व्योम्नि हा! कश्चित् काळमेघोऽभिदृश्यते।
लोक! त्वज्जठरे नास्त्येकान्तता क्वचिदप्यहो॥ १५॥

अन्तिके नगरे तस्मिन्नन्तरेऽवसरोचिते।
ब्राह्मणाः केचिदीर्ष्याया मूर्तिमन्तोऽभवन परम्॥ १६॥

"विपरीतो गतः कालो ब्राह्मणीधर्ममन्दिरे।
मुण्डनेन विवेशाद्य चण्डाली समभावतः॥ १७॥

तासां नीचशबर्या चैवासनाशनशायिकाः।
नैवादरः शास्त्रवाण्यामाचारानुष्ठितेष्वपि॥ १८॥

नैव यज्ञाः क्षितौ नैव देवाराधनमप्यहो।
न कोऽप्यधीते वेदं च, नास्ति जातिव्यवस्थितिः"॥ १९॥

इत्यादिकं ब्रुवन्तस्तदन्तर्भूतापदं च ते।
वर्णयन्तोऽग्रहारेषु व्यग्रा वार्तां न्यवेदयन्॥ २०॥

गत्वा क्षत्रियगेहानप्याश्राव्य सकलां स्थितिम्।
वैश्यांश्च चालयित्वैतद्वार्तां प्राघोषयन पुरि॥ २१॥

बहुना किं ? जनः सर्वो विना स्वास्थ्यमवर्तत।
अमात्यास्तरसा ज्ञातवन्तो राजगृहं च सा॥ २२॥

कथा प्राप; विवादोऽभूज्जवान्मन्त्रिसदस्यपि।
खिन्नो बभूव राजा चात्यन्तं मनसि सर्वथा॥ २३॥ युग्मकम्॥

धन्यः प्रसेनजिन्नामा बुद्धभक्तः श्रुतो भुवि।
उवाच स नृपस्त्वेवं प्रजारञ्जनतत्परः॥ २४॥

"सङ्घारामं प्राप्य तत्र भगवत्पादसन्निधौ।
शङ्कां निवेदयामस्तदन्यत् किं दुःखहारकम्॥ २५॥

सर्वज्ञो भगवान् , धर्मं स हि निर्वक्तुमर्हति।"
अथ प्राप्य विहारं तद्विधिर्दूतैर्निवेदितः॥ २६॥

आदायानुमतिं स्नेहात् सर्वे सम्भूयदर्शने।
उत्सुकाः सज्जयामासुस्तदर्थं संविधानकम्॥ २७॥

अन्येद्युरपराह्णेऽर्कः प्रतीच्यां नभसि स्थितः।
मलिनास्ये भुवो नित्यं स्वर्णरेणून् सुरञ्जयन्॥ २८॥

विदूरादथ रथ्यायां पौरस्त्यायां झटित्यहो!।
श्रूयते घनगम्भीरमनोहररथस्वनः॥ २९॥

म्लायद्वासरकान्तीनामुपर्याकीर्णधूळयः।
उत्पतन्त्यन्तरीक्षान्ते धूमोत्करसमं तदा॥ ३०॥

नानामार्गागतैर्लोकैरारामद्वारमावृतम्।
तदुत्थं मार्गविक्षोभं परिहर्तुमथ द्रुतम्॥ ३१॥

स्फुरदुत्क्षिप्तखड्गाङ्गरक्षकाः सादिनो भटाः।
कवाटं च समागत्य सर्वं शान्तिमकुर्वत॥ ३२॥ युग्मकम्॥

सङ्घारामे विवृद्धानां विटपीनामनातपाः।
आगतानतिथीन् सर्वान् स्नेहादरपुरःसरम्॥ ३३॥

प्रत्युद्यन्तो यथा दीर्घदीर्घं तत्र समास्थिताः।
दूर्वाभिरामच्छायायां तदा पूर्वदिगुन्मुखाः॥ ३४॥ युग्मकम्॥

अन्तर्मार्गेऽनिलालोलतरुमध्ये मनोहरम्।
उपर्यनुप्रस्थमत्र शतपत्रीसुतोरणम्॥ ३५॥

अस्तोन्मुखसहस्रांशुरश्मिभिर्बहुलीकृतम्।
समीकृता भूः संसिक्ता मृदूकृत्य सुमाम्बुना॥ ३६॥ युग्मकम्॥

पुष्पपर्णशुभोद्रिक्तशिल्पमार्गेण चाययौ।
आनन्दभिक्षुः शिष्यैश्चोदारः प्रत्युद्गमोत्सुकः॥ ३७॥

द्वारे तस्मिन् समायातं राजस्यन्दनमप्यथ।
कृत्वा परस्पराचारं रथाद् भूपोऽवतीर्णवान्॥ ३८॥

पुण्यारामं गतः पौरमुख्यमन्त्रिभिरन्वितः।
जोषं चचाल भूपेन्द्रो मितभूषापरिच्छदः॥ ३९॥

अन्तर्हितो जिगायाम्रोद्याने पुंस्कोकिलोत्करः।
तटिद्वत् पीतचटका डिड्ये जम्बूनिकुञ्जके॥ ४०॥

अर्धमारुह्य शारद्यामुत्पुच्छा तरुशायिका।
तस्थौ; देवो ददर्शेदं सकलं त्वन्तरान्तरा॥ ४१॥

अन्तरा रुचकारामे भग्नत्वक्फलसञ्चयात्।
माणिक्यखण्डानश्नीय शुकास्ते शरणत्रयम्॥ ४२॥

गायन्तश्च डयन्ते स्म भक्त्यादरसमन्वितम्।
"बुद्धं शरणं गच्छामि;
धर्मं शरणं गच्छामि;
सङ्घं शरणं गच्छामि"॥ ४३॥ युग्मकम्॥

तच्छ्रुत्वा तोषपूर्वं स भक्तोऽधात् पुळकं नृपः।
शीघ्रं प्रापुश्च सर्वेऽपि साक्षाद् बुद्धनिकेतनम्॥ ४४॥

उद्धृत्य कोष्ठावरणं प्रत्यक्षोऽभूद् जगद्गुरुः।
अपसृत्य सुवर्णाब्दानुद्यदुन्मुखसूर्यवत्॥ ४५॥

अवन्दत नृपो मौलिरत्नदीपितशालकः।
उद्ययौ भगवान् किञ्चिद् बाहू पीताम्बरावृतौ॥ ४६॥

क्षणोल्लसत्पताकावत्सुवर्णध्वजसन्निभम्।
ततश्चित्रास्तरे भूपमुपवेशयति स्म सः॥ ४७॥ युग्मकम्॥

बुद्धोऽपि निषसादात्र विशुद्धेऽळिन्दके मुदा।
प्रणम्यान्ये जनाः सर्वे निषण्णाश्च यथोचितम्॥ ४८॥

द्वारप्रकोष्ठे विस्तारपूर्णे रम्याङ्कणे तथा।
शालाया वामपार्श्वे सुख्याताः श्रमणिकाः स्थिताः॥ ४९॥ युग्मकम्॥

एवं दक्षिणपार्श्वे तु भिक्षुका अप्युपस्थिताः।
सन्ध्यासुवर्णमेघाढ्ये नभस्युज्ज्वलतारवत्॥ ५०॥

मध्ये वीरासनस्थं तं तेजोवलयिताननम्।
बुद्धं तरळचित्तोऽसौ महीपालो निरैक्षत॥ ५१॥

वस्तुनो लाघवात् पारं गद्गदोत्कण्ठितं नृपम्।
बद्धमौनं समीक्ष्यैवं स्वयमाह दयानिधिः॥ ५२॥

"वत्स! किं ननु मातङ्गीमधिकृत्यात्र संशयः?।
किं ब्रूमः? किं स्मरामो? हा! राजन्! जातिर्विडम्बना॥ ५३॥

क्रुद्धवा जन्तुर्युध्यति स्वनादस्यापि प्रतिध्वनिम्।
वल्यग्रादम्बराद् वा किमरण्या यागवह्निवत्॥ ५४॥

जायते द्विज इत्येतद् वद माम् त्वम् यथार्थतः।
रक्तेऽस्ति किं वा सा जातिरस्थिमज्जादिकेषु किम्?॥ ५५॥ युग्मकम्॥

द्विजस्य बीजपिण्डस्योषरं किं शबरीवपुः?।
पुण्ड्रो यज्ञोपवीतं वा शिखा वा जन्मजं किमु?॥ ५६॥

विनाचार्यादध्ययनं द्विजातिः प्रभवेत् किमु?।
अध्येतुमक्षरब्रह्म स्वयमेव नराधिप!॥ ५७॥

जायन्ते कृमिवन्मर्त्या म्रियन्ते च, समांश्च तान्।
निर्माति किं कल्यकर्मनियतेः करपल्लवः?॥ ५८॥

अण्डः कीटश्च वर्णाभपक्षाभ्यां गगने तते।
डयमानः पुष्पमधुपानोत्कः शलभश्च यः॥ ५९॥

सर्वे ते बहुधा दृष्टा परिवर्त्य यथाक्रमम्।
एकबीजं मूलमस्य सर्वस्य परमार्थतः॥ ६०॥ युग्मकम्॥

अङ्कुरः कलिका कोरकश्चापि सुममेव हि।
व्रीहीमूले चाङ्कुरितं तृणकं नैव शाबरः॥ ६१॥

ध्रुवं सम्भूय जीवेच्चेत् सोऽपि स्यात् सफलौषधिः।
एतस्य सिद्धो दृष्टान्तो मातङ्गीयं ममात्मजा॥ ६२॥

सत्यधर्मविरुद्धं हि शास्त्रं मा श्रद्धधा नृप! ।
अर्थप्रवचनं कुर्याद् व्यर्थं तत्रोदरम्भरी॥ ६३॥

मूढानां ह्यः कृतोऽबद्धस्त्वाचारोऽद्य भवेद् दृढः।
श्वो भवेच्छास्त्रमेवैष, तस्य नानुमतिं कुरु॥ ६४॥

किमर्थं कुत इत्येतदज्ञात्वैव नयन्ति हा! ।
अन्धकारप्रान्तरेऽस्मिन्नन्धानन्धास्त्वियं स्थितिः॥ ६५॥

वृक्षः सस्यो नीडजश्च चतुष्पादित्यसङ्ख्यतः।
जन्मतः परतो जन्तुर्मनुष्यः स्यात् कदाचन॥ ६६॥

अनेकसन्धिबद्धैका ममास्ते स्वर्णशृं खला।
पश्याम्येकैअकसन्धौ च तत्र मामेव भूयशः॥ ६७॥

धावच्छशवरः शाखामृगः शार्दूल इत्यपि ।
मृगयालुर्व्याधकश्च सर्वे तेऽहं नराधिप!॥ ६८॥

एवं सहोदराः, श्रीमन्!, हन्त! सर्वेऽपि जन्तवः।
किञ्चैकं सर्वमेवातो मर्त्यानामन्तरं किमु?॥ ६९॥

व्यामुग्धतां सुखेऽन्यस्य क्षेमेऽप्रीतिं च तन्वति।
ज्वलत्पामरचित्ते सद्धूमेर्ष्या जातिरुच्यते॥ ७०॥

गर्वो द्वेषोऽथ सकलमनोदोष इति स्वयम्।
परिवर्तयते सेयं सायंसन्ध्याब्दवर्णवत्॥ ७१॥

स्वकुटुम्बं विभजते बन्धूनेवं करोति च।
वर्गान् विभजते साऽन्त्ये लोकं नाशयति ध्रुवम्॥ ७२॥

स्वाश्रितानपि लोकं च खादन् कार्ष्णाग्निरेव सा।
असूयां तां महाव्याधिं जातिं कोऽपि न भावयेत्॥ ७३॥

जन्त्वधःपातको दोषः सर्वोऽस्यामस्ति - वच्म्यहम्।
राक्षस्येषा जिता चेत् तत् पिहितं नरकं ध्रुवम्॥ ७४॥

भोगासक्तां जन्तुरक्तरागां हिंसां च तां नृप! ।
बहिश्चकार राज्यात् स बिम्बिसारः समादृतः॥ ७५॥

नीचं स्वसमसृष्टं हि भ्रूण एव निहत्य सा।
जन्मैव निल्फलीकुर्वन्त्यस्ति कल्मषकारिणी॥ ७६॥

बहुचातुर्येण नानावर्णभाजमिमामपि।
जात्याख्यहिंसां भूपेन्द्र! भूतकारुण्यचिन्तया॥ ७७॥

नीत्यालोचनया चैव निष्कृष्टाज्ञाबलाद् भवान्।
यदि निष्कासयति तन्मङ्गळं स्यान्न संशयः॥ ७८॥ युग्मकम्॥

गत्वा तत् कुरु लोकक्षेमार्थं, धर्माश्रमं त्विमम्।
जातिबाधाविरहितं विधेहि नृपतेऽधुना॥ ७९॥

प्रार्थनेयं यज्ञयूपादजं रक्षितुमायतात्।
कण्ठाद् बहिर्गच्छतीति चिन्तयस्व विशेषतः॥ ८०॥

मोहं हित्वा जनं स्नेहं कर्तुं वद मिथो नृप!।
स्नेहादुदयते लोकः स्नेहादेव च वर्धते॥ ८१॥

स्नेह एव बलं लोके स्नेहः सन्तुष्टिरेव नः।
जीवितं स्नेह एवास्य व्याहृतिश्च मृतिर्ध्रुवम्॥ ८२॥

स्नेहस्तु नरकद्वीपे स्वर्गं स्रष्टुं च पाटवम्।
मातुश्चित्तसिरारक्तं स्तन्यं कर्तुं च मैत्र्ययम्॥ ८३॥

ईर्ष्यामृते नृणां जातिर्नैव नैवेति चावदम्"।
पुरो नत्वा ववन्देऽसौ राजा भक्त्यद्भुताकुलः॥ ८४॥

यथाज्ञापयतीत्याह स्फुटमञ्जलिपूर्वकम्।
आनन्दबाष्पं मुक्त्वाभूत् सभा चानतशीर्षका॥ ८५॥ युग्मकम्॥

लोलाश्रुपातपूर्वाङ्गार्द्राम्बरा भिक्षुकीततिः।
रेजे हिमासिक्तपुष्पकृतमालवनं यथा॥ ८६॥

सुवर्णकरपद्मैः सर्वेषामाशीर्वदन् मुदा।
अन्तर्जगाम तद् दिव्यरूपं लोकैकदीपकम्॥ ८७॥

उद्भूतोन्नतशाखिभ्यः स्वर्णाभा ह्यागता दिवं।
प्रत्यागता यथा देवाः - समाप्ता च महासभा॥ ८८॥

वासन्तीकुन्दकुमुदप्रसूनामोदचर्चिता।
शान्तिरेका प्रसरिता सर्वत्रात्यन्तशोभना॥ ८९॥

निमज्जति स्म निर्वाणे सर्वो लोकः स्वयं तदा।
शान्तिः सा भारते चास्मिन् सहस्राब्दमवर्तत॥ ९०॥